पौर्णमास्यौ तस्मात्ताः परिवर्जयेत् । पांशुवर्षे दिशां दाहे गोमायुविरुते तथा । श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद् द्विजः । नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा । वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च । प्राणि वा यदि वाऽप्राणि यत्किञ्चिच्छ्राद्धिकं भवेत् । तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः स्मृतः । चौरैरुपप्लुते ग्रामे संभ्रमे चाग्निकारिते । आकालिकमनध्यायं विद्यात् सर्वाद्भुतेषु च । उपाकर्मणि चोत्सर्गे त्रिरात्रं क्षपणं स्मृतम् । अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु । नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम् । न नावं, न खरं, नोष्ट्रं, नेरिणस्थो, न यानगः । न विवादे, न कलहे, न सेनायां, न सङ्गरे । न भुक्तमात्रे, नाजीर्णे, न वमित्वा, न सूतके । अतिथिञ्चाननुज्ञाप्य, मारुते वाति वा भृशम् । रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते । सामध्वनावृग्यजुषी नाधीयीत कदाचन । वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च” इति । याज्ञवल्क्यस्तु । “त्र्यहं प्रेतेष्वनध्यायः शिष्यर्त्विग्गुरुबन्धुषु । उपाकर्मणि, चोत्सर्गे, स्वशाखश्रोत्रिये मृते । सन्ध्यागर्जितनिर्घातभूकम्पोल्कानिपातने । समाप्य वेदं द्युनिशमारण्यकमधीत्य च । पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके । ऋतुसन्धिषु भुक्त्वा वा श्राद्धिकं प्रतिगृह्य च । पशुमण्डूकनकुलमार्जारश्वाहिमूषिकैः । कृतेऽन्तरे त्वहोरात्रं, शक्रपाते, तथोच्छ्रये । श्वक्रोष्टुगर्दभोलूकसामवाणार्त्तनिस्वने । अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके । देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे । भुक्त्वार्द्रपाणिरम्भोऽन्तरर्द्धरात्रेऽतिमारुते । पांशुवर्षे दिशां दाहे सन्ध्यानीहारभीतिषु । धावतः पूतिगन्धे च शिष्टे च गृहमागते । खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिणरोहणे । सप्तत्रिंशदनध्यायानेतांस्तात्कालिकान् विदुः” इति । वशिष्ठः । “तस्यानध्यायाः सन्ध्यास्तमिते सूतक शवे दिवाकीर्त्त्यौ नगरेषु कामं गोमयपर्य्युषिते परिलिखिते वा श्मशानान्ते शयानस्य श्राद्धिकस्य । मानवञ्चात्र श्लोकमुदाहरन्ति । फलान्यापस्तिलान् भक्ष्यमथान्यच्छ्राद्धिकं भवेत् । प्रतिगृह्याप्यनध्यायः पाण्यास्या, ब्राह्मणाः स्मृता इति ॥ धावतः पूतिगन्धप्रसृतेरिणवृक्षमारूढस्य, नावि, सेनायाञ्च, भुक्त्वा चार्द्रपाणे, वाणशब्दे, चतुर्द्दश्याममावास्यायामष्टम्याष्टकासु प्रसारितपादोपस्थस्योपाश्रितस्य गुरुसमीपे मिथुनव्यपेतायां वाससा मिथुनव्यपेतेनानिर्मुक्ते न ग्रामान्ते छर्दितस्य, मूत्रितस्योच्चरितस्य, यजुषाञ्च सामशब्दे, वाजीर्णे निर्घातभूमौ च न चन्द्रसूर्य्योपरागेषु, दिङ्नादपर्वतनादकम्पप्रपातेषूपलरुधिरपांशुवर्षेष्वाकालिकम् । उल्काविद्युत्सज्ज्योतिषमपर्त्त्वाकालिकं वा । आचार्य्ये च प्रेते त्रिरात्रमाचार्य्यपुत्रशिष्यभार्य्यास्वहोरात्रम् । ऋत्विग्योनिसम्बन्धेषु च” इति । शङ्खोऽप्याह । अनध्यायेष्वध्ययनं वर्जयेच्च प्रयत्नतः । चतुर्दशीं पञ्चदशीमष्टमीं राहुसूतकम् । उल्कापातं महीकम्पमशौचं ग्रामविप्लवम् । इन्द्रप्रयाणं सुरतं घनसंघातनिस्वनम् । वाद्यकोलाहलं युद्धमनध्यायं विवर्जयेत् । नाधीयीताभियुक्तोऽपि प्रयत्नाच्च वेगत” इति । “यद्दिनमहः क्रियते तद्दिनमनध्याय” इत्युक्तेः देवोत्सवादिदिनेऽपि अनध्याय इति केचित् तेन सारस्वतोत्सवे श्रीपञ्चमीदिवसे रथयात्रोत्सवादौ चानध्यायः । “महानवम्यां द्वादश्यां भरण्यामपि पर्वसु । तथाक्षयतृतीयायां शिष्यान्नाध्यापयेद् बुधः । माघमासे तु सप्तम्यां रथाख्यायाञ्च वर्जयेदिति” हारीतः । एवं नानास्मृत्युक्तेष्वेषु च येन सर्वसंग्रहस्तथाचरणीयम् ।

**अनन** न० अन—भावे ल्युट् । जीवने, गतौ च “प्राणननवान् प्राण” इत्यादि वे०सा० ।

**अननुगत** त्रि० न अनुगतः । अनुगतभिन्ने अनुगतस्य तुल्याकारप्रतीतिप्रयोजको धर्मभेदः यथा घट इति बुद्धौ घटत्वम् एवं पटत्वम् तस्य सर्वत्र एकरूपेण प्रतीयमानत्वात् । अननुगतञ्च तत्तद्व्यक्तित्वादिकं तस्य सर्वत्र प्रतीत्यभावात् । अपसारिते, अनधीने च ।

**अननुगम** पु० न अनुगमः अभावार्थे न०त० । अनुगमाभावे अनुगमस्य तुल्यप्रतीतिप्रयोजकधर्मानुसरणम् एतस्य न्यायादिदर्शनेषु भूरिप्रयोगः ।

**अनन्त** पु० नास्ति अन्तः गुणानां यस्य ब० । “गन्धर्वाप्सरसः सिद्धाः किन्नरोरगचारणाः । नान्तं गुणानां जानन्ति तेनानन्तोऽयमुच्यते” इत्युक्तलक्षणे विष्णौ, अनन्त ! ‘संसारमहासमुद्रे मग्नान् समभ्युद्धर वासुदेव !” इति भविष्यपुरा० । “विष्णुर्वीरोऽनन्त” इति विष्णुस० । मेघे । वक्षशीर्ष कात्वादपरिच्छिन्ने शेषनागे, तदवतारे बलभद्रे च । अन्तः परिच्छेदः देशतः कालतः वस्तुतश्च नास्ति यस्य । तस्मिन् परब्रह्मणि न० “सत्यं ज्ञानमनन्तं ब्रह्मेति” श्रुतिः । “न व्यापित्वाद्देशतोऽन्तो नित्यत्वान्नापि कालतः । न वस्तुतोऽपि सर्वात्म्यादानन्त्यं ब्रह्मणि त्रिधा । देशकालान्यवस्तूनां कल्पितत्वाच्च मायया । न देशादिकृतोऽन्तोऽस्ति